# संस्कृत-वार्ता:

दिनाङ्क :- 29/12/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- सर्वोच्चन्यायालयेन नूतन-अरावली-क्षेत्रपरिधि-परिभाषायाः विषये स्वकीयः आदेशः स्थगितोऽस्ति; विशेषज्ञ-समितेः प्रतिवेदनम् याचितम्, सर्वकारश्च सर्वोच्चन्यायालयस्य निर्णयस्य स्वागतम् अकरोत्।
- उन्नाव्-बलात्कार-प्रकरणे सर्वोच्चन्यायालयेन दिल्ली-उच्चन्यायालयस्य आदेशः स्थगितः, येन सेङ्गर् इत्यस्य आजीवन-दण्डस्य स्थगनानुमतिः निरस्ता।
- रक्षा-अधिग्रहण-परिषदा सशस्त्र-सेनायाः क्षमताभिवर्धनार्थं एकोनाशीति- सहस्र-कोटिरूप्यकाणां प्रस्तावना अनुमोदिता।
- उत्तरभारतस्य अनेकेषु भागेषु अग्रिमदिनेषु घनतः अतिघनात्मिका कुज्झघटिका भविष्यतीति ऋतुविज्ञानविभागस्य पूर्वानुमानम् अस्ति।
- ताईवान-देशः तस्य द्वीपं परितः चीन-देशस्य संयुक्तसैन्य-अभ्यासस्य निन्दां कृतवान्।
- चतुरङ्ग-क्रीडायां, कतर-देशस्य दोहा-नगरे विंशति-पञ्चविंशतितमवर्षस्य फिडे-वर्ल्ड्-रैपिड्-चैम्पियन्शिप इति क्रीडायां भारतस्य अर्जुन-एरिगैसी तथा कोनेरु-हम्पी इत्येतौ कांस्यपदकं प्राप्तवन्तौ।

---

<u>सर्वोच्चन्यायालय-अरावली</u>

सर्वोच्चन्यायालयेन नवम्बरमासस्य विंशतिदिनाङ्के अरावलीपर्वतानां अरावलीपरिधि-परिभाषायाः विषये प्रस्तुतः स्वकीयः आदेशः स्थगितोऽस्ति। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्तिः जे. के. माहेश्वरी अथ ए. जी. मसिह इत्येतेषां पीठेन अरावल्याः पर्वतत्वेन प्रदत्तपरिभाषायाः परीक्षणार्थं नूतन-विशेषज्ञ-समित्याः निर्माणस्य आदेशो दत्तः। अद्य स्वस्य निर्णये सर्वोच्चन्यायालयः अवदत् यत् पूर्वानुमोदितासु परिभाषासु स्पष्टीकरणम् आवश्यकम्

अस्तीति। न्यायालयः अवदत् यत्, केचन विषयाः सन्ति येषु स्पष्टीकरणस्य आवश्यकता भविष्यति। न्यायालयेन केन्द्राय, चतुर्भ्यः राजस्थान-गुजरात-दिल्ली-हरियाणादिभ्यः अरावली-राज्येभ्यश्च सूचना दत्ता, येन अस्मिन् विषये स्वप्रेरणया प्रकरणस्य विषये तेषां प्रतिक्रिया आगच्छेदिति। विषयेऽस्मिन् न्यायालयेन विचारणीयविषयत्वेन स्वयमेव संज्ञानं गृहीतमासीत्।

---------------------------------------------

## भूपेन्द्र – सर्वोच्चन्यायालय-अरावली

केन्द्रीय-पर्यावरण-वन-जलवायु-परिवर्तन-मन्त्री भूपेन्द्र-यादव: अरावली पर्वतमाला-सम्बद्धं सर्वोच्च-न्यायालयस्य निर्णयं स्वागतयोग्यं प्रत्यपादयत्। असौ प्रावोचत् यत् अरावली-क्षेत्रे नूतन-खनन-पट्टानां वितरण-विषये, पुरातन-खनन-पट्टानां च नवीनीकरण-विषये प्रतिबन्ध: यथावस्थमेव प्रवर्तयिष्यते। सर्वकारः अरावली पर्वत-मालिकाया: संरक्षणार्थं पुन: स्थापनार्थं च सर्वसम्भवम् आवश्यकं सहयोगाचरणं करिष्यति।

---------------------------------------------

## सर्वोच्चन्यायालयः-सेङ्गरः

सर्वोच्चन्यायालयेन अद्य दिल्ली-उच्चन्यायालयस्य सः आदेशः स्थगितः, यस्मिन् सप्तदशोत्तरद्विसहस्रतमे वर्षे उन्नाव्-बलात्कार-प्रकरणे निष्कासितस्य भाजपेति दलनेतुः कुलदीप सिङ्घ्-सेङ्गर इत्यस्य आजीवन-कारा-दण्डं स्थगितम् आसीत्, येन सः कारागारे एव तिष्ठेदिति सुनिश्चितं भवति स्म। मुख्यन्यायाधीशः सूर्यकान्त्, न्यायमूर्तिः जे. के. माहेश्वरी, अगस्टीन् जार्ज् मासिह् इत्येतेषां नेतृत्वे न्यायपीठेन सी. बी. आई. इत्यस्य याचिकायाः विषये श्रीसेङ्गर् इत्यस्मै सूचना दत्ता। सी. बी. आई. इत्यस्य पक्षतः उपस्थितेन सालिसिटर् जनरल् तुषार मेहता इत्यनेन उच्चन्यायालयस्य आदेशं स्थगयितुं न्यायपीठः प्रार्थितः। न्यायपीठेनोक्तं यत् सः विषयस्य परीक्षणं करिष्यति यतो हि विषयेऽस्मिन् विचारः आवश्यकः अस्तीति।

---------------------------------------------

## रक्षाक्षेत्रस्य प्रमुखोपलब्धि:

डी.ए.सी. इति रक्षाधिग्रहणपरिषदा भारतीय-सशस्त्र-बलानां क्षमता-संवर्धनार्थं प्रायः ऊनाशीति-सहस्र-कोटि-रूप्यकाणां रक्षा-प्रस्तावा: स्वीकृता: सन्ति। एतद्विषये नव-दिल्ल्याम् आयोजितस्य समुपवेशनस्य अध्यक्षता रक्षा-मन्त्रिणा राजनाथ-सिंहेन विहिता, यत्र सैन्य-बल-त्रयस्यापि आवश्यकतार्थं Acceptance of Necessity (AoN) इति अपरिहार्यावश्यकतार्थं स्वीकृति: प्रदत्ता।

-------------------------------------------

## राष्ट्रपतिः/ जामशेदपुर्-भ्रमणम् -

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुवर्या अद्य झार्खण्ड-राज्यस्य जमशेदपुर-नगरे राष्ट्रिय-प्रौद्योगिकी-संस्थानस्य पञ्चदशतमं दीक्षान्त-समारोहम् संबोधितवती। राष्ट्रपतिः अवदत् यत्, एन. आई. टी. इत्यादिभ्यः प्रतिष्ठित-शिक्षासंस्थानेभ्यः शिक्षाप्रापणं कस्मैश्चिदपि छात्राय सम्मानभाजनं भवतीति।

अद्य पूर्वाह्ने राष्ट्रपतिः द्रौपदी मुर्मुः झारखण्ड-राज्यस्य जमशेदपुर-नगरस्य करन्डीह-क्षेत्रस्य डिशोम् जाहेर्थान् इत्यत्र सन्थाली-भाषायाः ओल्-चिकी-लिप्याः शतवार्षिक-उत्सवे भागम् अगृह्णात्। राष्ट्रपतिः परम्परागतरूपेण जहेरथान् इत्यत्र पूजां करोति स्म। ध्यातव्यमस्ति यत् पण्डित्-रघुनाथ-मुर्मुः ओल-चिकी-लिप्याः जनकः इति गण्यते तस्य प्रतिमायाः स्थापनेन सह राष्ट्रपति: पुष्पमालां च अर्पितवती। राष्ट्रपतिः, संविधानस्य सन्थालीभाषायां ओल-चिकी-लिप्यां परिवर्तयितुं कृतप्रयासानां प्रशंसाम् अकरोत्।

-------------------------------------------

## गोयल्-ईक्टाः

वाणिज्य-उद्योग-मन्त्री पियूष्-गोयलः अद्य अवदत् यत् आगामिवर्षस्य जनवरीमासस्य प्रथमदिनाङ्कात् भारतीयेभ्यः निर्याताय शतप्रतिशतं आस्ट्रेलिया-देशस्य शुल्क-रेखा शून्य-शुल्करूपेण भविष्यतीति। सः अवदत् यत् एतेन श्रमप्रधानक्षेत्रेभ्यः नूतनानि अवसराणि उद्घाटयिष्यिन्ते इति।

------------------------------------------

ऋतु-विज्ञान-विभाग

भारतीय-ऋतु-विज्ञान-विभागेन सञ्चेतितम् अस्ति यद् आगामि दिनद्वयं यावद् उत्तर-भारतस्य कतिपय-भागेषु सघन कुज्झटिका आच्छादिता भविष्यति। पंजाब, हरियाणा, चंडीगढ़, दिल्ली, उत्तरप्रदेश, बिहार, हिमाचलप्रदेश चेति राज्येषु दृश्यता शून्य-त: पञ्चाशत्-मीटर-मितमेव भवितुम् अर्हति। ऋतु-वैज्ञानिकानाम् अनुसारेण, जनवरी प्रथमा-त: कुज्झटिकायां शनै: शनै: न्यूनता आयास्यति इति सम्भावना वर्तते। तत्रैव, पश्चिमीय-विक्षोभस्य कारणेन पर्वतीय-क्षेत्रेषु हिमपातः अपि सम्भविष्यति।

------------------------------------------

दिल्ली-पुलिस

आगामि-नववर्ष-समारोहं निध्याय दिल्ली यातायातारक्षि-बलेन समस्तेऽपि राजधानी क्षेत्रे सुरक्षाया: यातायातस्य च नियमा: दृढतया पालनार्थं जना: निर्दिष्टा: सन्ति। अत्रान्तरे यानानां तीव्रगति-प्रसङ्गं रेड लाइट इति रक्त-वर्णीय-दीपकस्य उल्लंघनस्य प्रसङ्गं च सन्दृभ्य पारेसहस्रं ई-चालान इति अर्थ-दण्डप्रवर्तनमपि कृतम् अस्ति। आरक्षि-बलेन जना: अध्यर्थिता: सन्ति यत् ते मद्यादिकं निपीय वाहनानि नैव चालयेयु:, यातायात-नियमानां पालनं कुर्यु:, सुरक्षित-पद्धत्या नव-वर्षोत्सवम् आमानयन्तु च।

------------------------------------------

ताईवान-चीन ड्रिल्ः

ताईवान-देशः अद्य द्वीपस्य परितः चीन-देशस्य संयुक्तसैन्य-अभ्यासस्य निन्दाम् अकरोत्, अन्ताराष्ट्रिय-मानदण्डान् अवहेल्य, समीपस्थदेशान् प्रति भयजनयितुं सैन्य-भीतिप्रयोगं च चीनदेशः अकरोदिति उक्तवान्।

------------------------------------------

## चतुरङ्ग-क्रीडा

चतुरङ्ग-क्रीडायां भारतस्य कृते गर्वस्य क्षण: वर्तते । कतर देशस्य दोहा-नगरे ऐषम: फिडे वर्ल्ड रैपिड चेस चैंपियनशिप इति विश्वविजेतृ-स्पर्धा आयोजिता, यत्र भारतस्य अर्जुन एरिगैसी, कोनेरू हम्पी चेति क्रमशः पुरुषवर्गे महिला वर्गे च कांस्य पदकं व्यजयताम्।

पुरुष वर्गे नॉर्वे देशस्य मैग्नस कार्लसन इत्यनेन दशमलवोत्तर-पञ्चाधिक दशमितै: अङ्कै: साकं विजय: अधिगत:, अपरत्र च महिला वर्गे अलेक्ज़ेंड्रा गोरयाचकिना इत्यनया प्रथमं स्थानम् अधिगतम्। एषा प्रतियोगिता त्रयोदश-चक्रेषु क्रीडिता आसीत्।

---

## प्रधानमंत्री-चतुरङ्ग-क्रीडा-बधाई

प्रधानमन्त्रिणा नरेन्द्र मोदिना अर्जुन एरिगैसी कोनेरू हम्पी चेति एतदुपलब्धि-कृते स्वस्ति-वचोभिः अभिनंदनपूर्वकं वर्धापितौ। सोशल मीडिया इति सामाजिक-सञ्जालीय-सन्देशे प्रधानमन्त्री व्यालिखत् यत् उभाभ्यामपि क्रीडकाभ्यां निजसमर्पणेन कठिन-परिश्रमेण च देशस्य नाम प्रकाशितं कृतम्। साकमेव श्रीमोदिना तयो: उज्ज्वल-भविष्यार्थमपि शुभकामना: वितरिता:।

।। इति वार्ताः ।।